# shrIvallabhAShTakam 1

# શ્રીવલ્લભાષ્ટકમ્ ૧

## Document Information

Text title : vallabhAShTakam 1

File name : vallabhAShTakam1.itx

Category : deities_misc, gurudev, puShTimArgIya, aShTaka

Location : doc_deities_misc

Author : viThThaladIkShita

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવલ્લભાષ્ટકમ્ ૧

શ્રીમદ્વૃન્દાવનેન્દુપ્રકટિતરસિકાનન્દસન્દોહરૂપ-
સ્ફૂર્જદ્રાસાદિલીલાઽમૃતજલધિભરાક્રાન્તસર્વોઽપિ શશ્વત્ ।
તસ્યૈષાત્માનુભાવપ્રકટનહૃદયસ્યાજ્ઞયા પ્રાદુરાસીદ્-
ભૂમૌ યઃ સન્મનુષ્યાકૃતિરતિકરુણસ્તં પ્રપદ્યે હુતાશમ્ ॥ ૧॥

નાવિર્ભૂયાદ્ભવાંશ્ચેદધિધરણિતલં ભૂતનાથોદિતાસ-
ન્માર્ગધ્વાન્તાન્ધતુલ્યા નિગમપથપતૌ દેવસર્ગેઽપિ જાતાઃ ।
ઘોષાધીશં તદેમે કથમપિ મનુજાઃ પ્રાપ્નુયુર્નૈવ દેવી-
સૃષ્ટિર્વ્યર્થા ચ ભૂયાન્નિજફલરહિતા દેવવૈશ્વાનરૈષા ॥ ૨॥

ન હ્યન્યો વાગધીશાચ્છ્રુતિગણવચસાં ભાવમાજ્ઞાતુમીષ્ટે
યસ્માત્સાધ્વી સ્વભાવં પ્રકટયતિ વધૂરગ્રતઃ પત્યુરેવ ।
તસ્માચ્છ્રીવલ્લભાખ્ય ત્વદુદિતવચનાદન્યથા રૂપયન્તિ
ભ્રાન્તા યે તે નિસર્ગત્રિદશરિપુતયા કેવલાન્ધન્તમોગાઃ ॥ ૩॥

પ્રાદુર્ભૂતેન ભૂમૌ વ્રજપતિચરણામ્ભોજસેવાખ્યવર્ત્મ-
પ્રાકટ્યં યત્કૃતં તે તદુત નિજકૃતે શ્રીહુતાશેતિ મન્યે ।
યસ્માદસ્મિંસ્થિતો યત્કિમપિ કથમપિ ક્વાપ્યુપાહર્તુમિચ્છ-
ત્યદ્ધા તદ્ગોપિકેશઃ સ્વવદનકમલે ચારુહાસે કરોતિ ॥ ૪॥

ઉષ્ણત્વૈકસ્વભાવોઽપ્યતિશિશિરવચઃપુઞ્જપીયૂષવૃષ્ટી-
રાર્તેષ્વત્યુગ્રમોહાસુરનૃષુ યુગપત્તાપમપ્યત્ર કુર્વન્ ।
સ્વસ્મિન્ કૃષ્ણાસ્યતાં ત્વં પ્રકટયસિ ચ નો ભૂતદેવત્વમેત-
દ્યસ્માદાનન્દદં શ્રીવ્રજજનનિચયે નાશકં ચાસુરાગ્નેઃ ॥ ૫॥

આમ્નાયોક્તં યદમ્ભોભવનમનલતસ્તચ્ચ સત્યં વિભોર્ય-
ત્સર્ગાદૌ ભૂતરૂપાદભવદનલતઃ પુષ્કરં ભૂતરૂપમ્ ।
આનન્દૈકસ્વરૂપાત્ત્વદધિભુ યદભૂત્કૃષ્ણસેવારસાબ્ધિ-
શ્ચાનન્દૈકસ્વરૂપસ્તદખિલમુચિતં હેતુસામ્યં હિ કાર્યે ॥ ૬॥

સ્વામિચ્છ્રીવલ્લભાગ્રે ક્ષણમપિ ભવતઃ સન્નિધાને કૃપાતઃ
પ્રાણપ્રેષ્ઠવ્રજાધીશ્વરવદનદિદૃક્ષાર્તિતાપો જનેષુ ।
યત્પ્રાદુર્ભાવમાપ્નોત્યુચિતતરમિદં યત્તુ પશ્ચાદપીત્થં
દૃષ્ટેઽપ્યસ્મિન્મુખેન્દૌ પ્રચુરતરમુદેત્યેવ તચ્ચિત્રમેતત્ ॥ ૭॥

અજ્ઞાનાધન્ધકારપ્રશમનપટુતાખ્યાપનાય ત્રિલોક્યા-
મગ્નિત્ત્વં વર્ણિતં તે કવિભિરપિ સદા વસ્તુતઃ કૃષ્ણ એવ ।
પ્રાદુર્ભૂતો ભવાનિત્યનુભવનિગમાદ્યુક્તમાનૈરવેત્ય
ત્વાં શ્રીશ્રીવલ્લભે મે નિખિલબુધજના ગોકુલેશં ભજન્તે ॥ ૮॥

ઇતિ શ્રીમદ્વિઠ્ઠલદીક્ષિતવિરચિતં શ્રીવલ્લભાષ્ટકં ૧ સમાપ્તમ્ ।

Proofread by PSA Easwaran

*shrIvallabhAShTakam 1*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*